# Annapurna Upanishad

# અન્નપૂર્ણોપનિષત્

## Document Information

Text title : Annapurna Upanishad

File name : annapurnaupan.itx

Category : upanishhat, svara, devii, annapUrNA, devI

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 70 / 108; Atharva Veda - Samanya upanishad

Latest update : August 9, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અન્નપૂર્ણોપનિષત્

સર્વાપહ્નવસંસિદ્ધબ્રહ્મમાત્રતયોજ્જ્વલમ્ ।
ત્રૈપદં શ્રીરામતત્ત્વં સ્વમાત્રમિતિ ભાવયે ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँસસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ નિદાઘો નામ યોગીન્દ્ર ઋભું બ્રહ્મવિદાં વરમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમાવુત્થાય સ પુનર્મુનિઃ ॥ ૧॥

આત્મતત્ત્વમનુબ્રૂહીત્યેવં પપ્રચ્છ સાદરમ્ ।
કયોપાસનયા બ્રહ્મન્નીદૃશં પ્રાપ્તવાનસિ ॥ ૨॥

તાં મે બ્રૂહિ મહાવિદ્યાં મોક્ષસામ્રાજ્યદાયિનીમ્ ।
નિદાઘ ત્વં કૃતાર્થોઽસિ શૃણુ વિદ્યાં સનાતનીમ્ ॥ ૩॥

યસ્યા વિજ્ઞાનમાત્રેણ જીવન્મુક્તો ભવિષ્યસિ ।
મૂલશૃઙ્ગાટમધ્યસ્થા બિન્દુનાદકલાશ્રયા ॥ ૪॥

નિત્યાનન્દા નિરાધારા વિખ્યાતા વિલસત્કચા ।
વિષ્ટપેશી મહાલક્ષ્મીઃ કામસ્તારો નતિસ્તથા ॥ ૫॥

ભગવત્યન્નપૂર્ણેતિ મમાભિલષિતં તતઃ ।
અન્નં દેહિ તતઃ સ્વાહા મન્ત્રસારેતિ વિશ્રુતા ॥ ૬॥

સપ્તવિંશતિ વર્ણાત્મા યોગિનીગણસેવિતા ॥ ૭॥

ઐં હ્રીં સૌં શ્રીં ક્લીમોન્નમો ભગવત્યન્નપૂર્ણે

મમાભિલષિતમન્નં દેહિ સ્વાહા ।
ઇતિ પિત્રોપદિષ્ટોઽસ્મિ તદાદિનિયમઃ સ્થિતઃ ।
કૃતવાન્સ્વાશ્રમાચારો મન્ત્રાનુષ્ઠાનમન્વહમ્ ॥ ૮॥

એવં ગતે બહુદિને પ્રાદુરાસીન્મમાગ્રતઃ ।
અન્નપૂર્ણા વિશાલાક્ષી સ્મયમાનમુખામ્બુજા ॥ ૯॥

તાં દૃષ્ટ્વા દણ્ડવદ્ભૂમૌ નત્વા પ્રાઞ્જલિરાસ્થિતઃ ।
અહો વત્સ કૃતાર્થોઽસિ વરં વરય મા ચિરમ્ ॥ ૧૦॥

એવમુક્તો વિશાલાક્ષ્યા મયોક્તં મુનિપુઙ્ગવ ।
આત્મતત્ત્વં મનસિ મે પ્રાદુર્ભવતુ પાર્વતિ ॥ ૧૧॥

તથૈવાસ્થિતિ મામુક્ત્વા તત્રૈવાન્તરધીયત ।
તદા મે મતિરુત્પન્ના જગદ્વૈચિત્ર્યદર્શનાત્ ॥ ૧૨॥

ભ્રમઃ પઞ્ચવિધો ભાતિ તદેવેહ સમુચ્યતે ।
જીવેશ્વરૌ ભિન્નરૂપાવિતિ પ્રાથમિકો ભ્રમઃ ॥ ૧૨॥

આત્મનિષ્ઠં કર્તૃગુણં વાસ્તવં વા દ્વિતીયકઃ ।
શરીરત્રયસંયુક્તજીવઃ સઙ્ગી તૃતીયકઃ ॥ ૧૩॥

જગત્કારણરૂપસ્ય વિકારિત્વં ચતુર્થકઃ ।
કારણાદ્ભિન્નજગતઃ સત્યત્વં પઞ્ચમો ભ્રમઃ ।
પઞ્ચભ્રમનિવૃત્તિશ્ચ તદા સ્ફુરતિ ચેતસિ ॥ ૧૫॥

બિમ્બપ્રતિબિમ્બદર્શનેન ભેદભ્રમો નિવૃત્તઃ ।
સ્ફટિકલોહિતદર્શનેન પારમાર્થિકકર્તૃત્વભ્રમો નિવૃત્તઃ ।
ઘટમઠાકાશદર્શનેન સઙ્ગીતિભ્રમો નિવૃત્તઃ ।
રજ્જુસર્પદર્શનેન કારણાદ્ભિન્નજગતઃ સત્યત્વભ્રમો નિવૃત્તઃ ।
કનકરુચકદર્શનેન વિકારિત્વભ્રમો નિવૃત્તઃ ।
તદાપ્રભૃતિ મચ્ચિત્તં બ્રહ્માકારમભૂત્સ્વયમ્ ।
નિદાઘ ત્વમપીત્થં હિ તત્ત્વજ્ઞાનમવાપ્નુહિ ॥ ૧૬॥

નિદાઘઃ પ્રણતો ભૂત્વા ઋભું પપ્રચ્છ સાદરમ્ ।
બ્રૂહિ મે શ્રદ્દધાનાય બ્રહ્મવિદ્યામનુત્તમામ્ ॥ ૧૭॥

તથેત્યાહ ઋભુઃ પ્રીતસ્તત્ત્વજ્ઞાં વદામિ તે ।
મહાકર્તા મહાભોક્તા મહાત્યાગી ભવાનઘ ।

સ્વસ્વરૂપાનુસન્ધાનમેવં કૃત્વા સુખી ભવ ॥ ૧૮॥

નિત્યોદિતં વિમલમાદ્યમનતરૂપં
    બ્રહ્માસ્મિ નેતરકલાકલનં હિ કિંચિત્ ।
ઇત્યેવ ભાવય નિરઞ્જનતામુપેતો
    નિર્વાણમેહિ સકલામલશાન્તવૃત્તિઃ ॥ ૧૯॥

યદિદં દૃશ્યતે કિંચિત્તત્તન્નાસ્તીતિ ભાવય ।
યથા ગન્ધર્વનગરં યથા વારિ મરુસ્થલે ॥ ૨૦॥

યત્તુ નો દૃશ્યતે કિંચિદ્યન્નુ કિંચિદિવ સ્થિતમ્ ।
મનઃષષ્ઠેન્દ્રિયાતીતં તન્મયો ભવ વૈ મુને ॥ ૨૧॥

અવિનાશિ ચિદાકાશં સર્વાત્મકમખણ્ડિતમ્ ।
નીરન્ધ્રં ભૂરિવાશેષં તદસ્મીતિ વિભાવય ॥ ૨૨॥

યદા સંક્ષીયતે ચિત્તમભાવાત્યન્તભાવનાત્ ।
ચિત્સામાન્યસ્વરૂપસ્ય સત્તાસામાન્યતા તદા ॥ ૨૩॥

નૂનં ચૈત્યાંશરહિતા ચિદ્યદાત્મનિ લીયતે ।
અસદ્રૂપવદત્યચ્છા સત્તાસામાન્યતા તદા ॥ ૨૪॥

દૃષ્ટિરેષા હિ પરમા સદેહાદેહયોઃ સમા ।
મુક્તયોઃ સંભવત્યેવ તુર્યાતીતપદાભિધા ॥ ૨૫॥

વ્યુત્થિતસ્ય ભવત્યેષા સમાધિસ્થસ્ય ચાનઘ ।
જ્ઞસ્ય કેવલમજ્ઞસ્ય ન ભવત્યેવ બોધજા ।
અનાનન્દસમાનન્દમુગ્ધમુગ્ધમુખદ્યુતિઃ ॥ ૨૬॥

ચિરકાલપરિક્ષીણમનનાદિપરિભ્રમઃ ।
પદમાસાદ્યતે પુણ્યં પ્રજ્ઞયૈવૈકયા તથા ॥ ૨૭॥

ઇમં ગુણસમાહારમનાત્મત્વેન પશ્યતઃ ।
અન્તઃશીતલયા યાસૌ સમાધિરિતિ કથ્યતે ॥ ૨૮॥

અવાસનં સ્થિરં પ્રોક્તં મનોધ્યાનં તદેવ ચ ।
તદેવ કેવલીભાનં શાન્તતૈવ ચ તત્સદા ॥ ૨૯॥

તનુવાસનમત્યુચ્ચૈઃ પદાયોદ્યતમુચ્યતે ।
અવાસગં મનોઽકર્તૃપદં તસ્માદવાપ્યતે ॥ ૩૦॥

ઘનવાસનમેતત્તુ ચેતઃકર્તૃત્વભાવનમ્ ।
સર્વદુઃખપ્રદં તસ્માદ્વાસનાં તનુતાં નયેત્ ॥ ૩૧॥

ચેતસા સમ્પરિત્યજ્ય સર્વભાવાત્મભાવનામ્ ।
સર્વમાકાશતામેતિ નિત્યમન્તર્મુખસ્થિતેઃ ॥ ૩૨॥

યથા વિપણગા લોકા વિહરન્તોઽપ્યસત્સમાઃ ।
અસંબન્ધાત્તથા જ્ઞસ્ય ગ્રામોઽપિ વિપિનોપમઃ ॥ ૩૩॥

અન્તર્મુખતયા નિત્યં સુપ્તો બુદ્ધો વ્રજન્પઠન્ ।
પુરં જનપદં ગ્રામમરણ્યમિવ પશ્યતિ ॥ ૩૪॥

અન્તઃશીતલતાયાં તુ લબ્ધાયાં શીતલં જગત્ ।
અન્તસ્તૃષ્ણોપતપ્તાનાં દાવદાહમયં જગત્ ॥ ૩૫॥

ભવત્યખિલજન્તૂનાં યદન્તસ્તદ્બહિઃ સ્થિતમ્ ॥ ૩૬॥

યસ્ત્વાત્મરતિરેવાન્તઃ કુર્વન્કર્મેન્દ્રિયૈઃ ક્રિયાઃ ।
ન વશો હર્ષશોકાભ્યાં સ સમાહિત ઉચ્યતે ॥ ૩૭॥

આત્મવત્સર્વભૂતાનિ પરદ્રવ્યાણિ લોષ્ઠવત્ ।
સ્વભાવાદેવ ન ભયાદ્યઃ પશ્યતિ સ પશ્યતિ ॥ ૩૮॥

અદ્યૈવ મૃતિરાયાતુ કલ્પાન્તનિચયેન વા ।
નાસૌ કલઙ્કમાપ્નોતિ હેમ પઙ્કગતં યથા ॥ ૩૯॥

કોઽહં કથમિદં કિં વા કથં મરણજન્મની ।
વિચારયાન્તરે વેત્થં મહત્તત્ફલમેષ્યસિ ॥ ૪૦॥

વિચારેણ પરિજ્ઞાતસ્વભાવસ્ય સતસ્તવ ।
મનઃ સ્વરૂપમુત્સૃજ્ય શમમેષ્યતિ વિજ્વરમ્ ॥ ૪૧॥

વિજ્વરત્વં ગતં ચેતસ્તવ સંસારવૃત્તિષુ ।
ન નિમજ્જતિ તદ્બ્રહ્મન્ગોષ્પદેષ્વિવ વારણઃ ॥ ૪૨॥

કૃપણં તુ મનો બ્રહ્મન્ગોષ્પદેઽપિ નિમજ્જતિ ।
કાર્યે ગોષ્પદતોયેઽપિ વિશીર્ણો મશકો યથા ॥ ૪૩॥

યાવદ્યાવન્મુનિશ્રેષ્ઠ સ્વયં સંતજ્યતેઽખિલમ્ ।
તાવત્તાવત્પરાલોકઃ પરમાત્મૈવ શિષ્યતે ॥ ૪૪॥

યાવત્સર્વં ન સંત્યક્તં તાવદાત્મા ન લભ્યતે ।
સર્વવસ્તુપરિત્યાગે શેષ આત્મેતિ કથ્યતે ॥ ૪૫॥

આત્માવલોકનાર્થં તુ તસ્માત્સર્વં પરિત્યજેત્ ।
સર્વં સંત્યજ્ય દૂરેણ યચ્છિષ્ટં તન્મયો ભવ ॥ ૪૬॥

સર્વં કિંચિદિદં દૃશ્યં દૃશ્યતે યજ્જગદ્ગતમ્ ।
ચિન્નિષ્પન્દાંશમાત્રં તન્નાન્યત્કિંચન શાશ્વતમ્ ॥ ૪૭॥

સમાહિતા નિત્યતૃપ્તા યથાભૂતાર્થદર્શિની ।
બ્રહ્મન્સમાધિશબ્દેન પરા પ્રજ્ઞોચ્યતે બુધૈઃ ॥ ૪૮॥

અક્ષુબ્ધા નિરહંકારા દ્વન્દ્વેષ્વનનુપાતિની ।
પ્રોક્તા સમાધિશબ્દેન મેરોઃ સ્થિરતરા સ્થિતિઃ ॥ ૪૯॥

નિશ્ચિતા વિગતાભીષ્ટા હેયોપદેયવર્જિતા ।
બ્રહ્મન્સમાધિશબ્દેન પરિપૂર્ણા મનોગતિઃ ॥ ૫૦॥

કેવલં ચિત્પ્રકાશાંશકલ્પિતા સ્થિરતાં ગતા ।
તુર્યા સા પ્રાપ્યતે દૃષ્ટિર્મહદ્ભિર્વેદવિત્તમૈઃ ॥ ૫૧॥

અદૂરગતસાદૃશ્યા સુષુપ્તસ્યોપલક્ષ્યતે ।
મનોહંકારવિલયે સર્વભાવાન્તરસ્થિતા ॥ ૫૨॥

સમુદેતિ પરાનન્દા યા તનુઃ પારમેશ્વરી ।
મનસૈવ મનશ્છિત્ત્વા સા સ્વયં લભ્યતે ગતિઃ ॥ ૫૩॥

તદનુ વિષયવાસનાવિનાશ-
    સ્તદનુ શુભઃ પરમઃ સ્ફુટપ્રકાશઃ ।
તદનુ ચ સમતાવશાત્સ્વરૂપે
    પરિણમનં મહતામચિન્ત્યરૂપમ્ ॥ ૫૪॥

અખિલમિદમનન્તમનન્તમાત્મતત્ત્વં
    દૃઢપરિણામિનિ ચેતસિ સ્થિતોઽન્તઃ ।
બહિરુપશમિતે ચરાચરાત્મા
    સ્વયમનુભૂયત એવ દેવદેવઃ ॥ ૫૫॥

અસક્તં નિર્મલં ચિત્તં યુક્તં સંસાર્યવિસ્ફુટમ્ ।
સક્તં તુ દીર્ઘતપસા મુક્તમપ્યતિબદ્ધવત્ ॥ ૫૬॥

અન્તઃસંસક્તિનિર્મુક્તો જીવો મધુરવૃત્તિમાન્ ।
બહિઃ કુર્વન્નકુર્વન્વા કર્તા ભોક્તા ન હિ ક્વચિત્ ॥ ૫૭॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

નિદાઘ ઉવાચ ॥

સઙ્ગઃ કીદૃશ ઇત્યુક્તઃ કશ્ચ બન્ધાય દેહિનામ્ ।
કશ્ચ મોક્ષાય કથિતઃ કથં ત્વેષ ચિકિત્સ્યતે ॥ ૧॥

દેહદેહિવિભાગૈકપરિત્યાગેન ભાવના ।
દેહમાત્રે હિ વિશ્વાસઃ સઙ્ગો બન્ધાય કથ્યતે ॥ ૨॥

સર્વમાત્મેદમત્રાહં કિં વાઞ્છામિ ત્યજામિ કિમ્ ।
ઇત્યસઙ્ગસ્થિતિં વિદ્ધિ જીવન્મુક્તતનુસ્થિતામ્ ॥ ૩॥

નાહમસ્મિ ન ચાન્યોસ્તિ ન ચાયં ન ચ નેતરઃ ।
સોઽસઙ્ગ ઇતિ સમ્પ્રોક્તો બ્રહ્માસ્મીત્યેવ સર્વદા ॥ ૪॥

નાભિનન્દતિ નૈષ્કર્મ્યં ન કર્મસ્વનુષજ્જતે ।
સુસમો યઃ પરિત્યાગી સોઽસંસક્ત ઇતિ સ્મૃતઃ ॥ ૫॥

સર્વકર્મફલાદીનાં મનસૈવ ન કર્મણા ।
નિપુણો યઃ પરિત્યાગી સોઽસંસક્ત ઇતિ સ્મૃતઃ ॥ ૬॥

અસંકલ્પેન સકલાશ્ચેષ્ટા નાના વિજૃંભિતાઃ ।
ચિકિત્સિતા ભવન્તીહ શ્રેયઃ સમ્પાદયન્તિ હિ ॥ ૭॥

ન સક્તમિહ ચેષ્ટાસુ ન ચિન્તાસુ ન વસ્તુષુ ।
ન ગમાગમચેષ્ટાસુ ન કાલકલનાસુ ચ ॥ ૮॥

કેવલં ચિતિ વિશ્રમ્ય કિંચિચ્ચૈત્યાવલંબ્યપિ ।
સર્વત્ર નીરસમિહ તિષ્ઠત્યાત્મરસં મનઃ ॥ ૯॥

વ્યવહારમિદં સર્વં મા કરોતુ કરોતુ વા ।
અકુર્વન્વાપિ કુર્વન્વા જીવઃ સ્વાત્મરતિક્રિયઃ ॥ ૧૦॥

અથવા તમપિ ત્યક્ત્વા ચૈત્યાંશં શાન્તચિદ્ઘનઃ ।
જીવસ્તિષ્ઠતિ સંશાન્તો જ્વલન્મણિરિવાત્મનિ ॥ ૧૧॥

ચિત્તે ચૈત્યદશાહીને યા સ્થિતિઃ ક્ષીણચેતસામ્ ।

સોચ્યતે શાન્તકલના જાગ્રત્યેવ સુષુપ્તતા ॥ ૧૨॥

એષા નિદાઘ સૌષુપ્તસ્થિતિરભ્યાસયોગતઃ ।
પ્રૌઢા સતી તુરીયેતિ કથિતા તત્ત્વકોવિદૈઃ ॥ ૧૩॥

અસ્યાં તુરીયાવસ્થાયાં સ્થિતિં પ્રાપ્યાવિનાશિનીમ્ ।
આનન્દૈકાન્તશીલત્વાદનાનન્દપદં ગતઃ ॥ ૧૪॥

અનાનન્દમહાનન્દકાલાતીતસ્તતોઽપિ હિ ।
મુક્ત ઇત્યુચ્યતે યોગી તુર્યાતીતપદં ગતઃ ॥ ૧૫॥

પરિગલિતસમસ્તજન્મપાશઃ
 સકલવિલીનતમોમયાભિમાનઃ ।
પરમરસમયીં પરાત્મસત્તાં
 જલગતસૈન્ધવખણ્ડવન્મહાત્મા ॥ ૧૬॥

જડાજડદૃશોર્મધ્યે યત્તત્ત્વં પારમાર્થિકમ્ ।
અનુભૂતિમયં તસ્માત્સારં બ્રહ્મેતિ કથ્યતે ॥ ૧૭॥

દૃશ્યસંવલિતો બન્ધસ્તન્મુક્તૌ મુક્તિરુચ્યતે ।
દ્રવ્યદર્શનસંબન્ધે યાનુભૂતિરનામયા ॥ ૧૮॥

તામવષ્ટભ્ય તિષ્ઠ ત્વં સૌષુપ્તીં ભજતે સ્થિતિમ્ ।
સૈવ તુર્યત્વમાપ્નોતિ તસ્યાં દૃષ્ટિં સ્થિરાં કુરુ ॥ ૧૯॥

આત્મા સ્થૂલો ન ચૈવાણુર્ન પ્રત્યક્ષો ન ચેતરઃ ।
ન ચેતનો ન ચ જડો ન ચૈવાસન્ન સન્મયઃ ॥ ૨૦॥

નાહં નાન્યો ન ચૈવૈકો ન ચાનેકોઽદ્વયોઽવ્યયઃ ।
યદીદં દૃશ્યતાં પ્રાપ્તં મનઃ સર્વેન્દ્રિયાસ્પદમ્ ॥ ૨૧॥

દૃશ્યદર્શનસંબન્ધે યત્સુખં પારમાર્થિકમ્ ।
તદતીતં પદં યસ્માત્તન્ન કિંચિદિવૈવ તત્ ॥ ૨૨॥

ન મોક્ષો નભસઃ પૃષ્ઠે ન પાતાલે ન ભૂતલે ।
સર્વાશાસંક્ષયે ચેતઃક્ષયો મોક્ષ ઇતીષ્યતે ॥ ૨૩॥

મોક્ષો મેઽસ્ત્વિતિ ચિન્તાન્તર્જાતા ચેદુત્થિતં મનઃ ।
મનનોત્થે મનસ્યેષ બન્ધઃ સાંસારિકો દૃઢઃ ॥ ૨૪॥

આત્મન્યતીતે સર્વસ્માત્સર્વરૂપેઽથ વા તતે ।

કો બન્ધઃ કશ્ચ વા મોક્ષો નિર્મૂલં મનનં કુરુ ॥ ૨૫॥

અધ્યાત્મરતિરાશાન્તઃ પૂર્ણપાવનમાનસઃ ।
પ્રાપ્તાનુત્તમવિશ્રાન્તિર્ન કિંચિદિહ વાઞ્છતિ ॥ ૨૬॥

સર્વાધિષ્ઠાનસન્માત્રે નિર્વિકલ્પે ચિદાત્મનિ ।
યો જીવતિ ગતસ્નેહઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૭॥

નાપેક્ષતે ભવિષ્યચ્ચ વર્તમાને ન તિષ્ઠતિ ।
ન સંસ્મરત્યતીતં ચ સર્વમેવ કરોતિ ચ ॥ ૨૮॥

અનુબન્ધપરે જન્તાવસંસર્ગમનાઃ સદા ।
ભક્તે ભક્તસમાચરઃ શઠે શઠ ઇવ સ્થિતઃ ॥ ૨૯॥

બાલો બાલેષુ વૃદ્ધેષુ વૃદ્ધો ધીરેષુ ધૈર્યવાન્ ।
યુવા યૌવનવૃત્તેષુ દુઃખિતેષુ સુદુઃખધીઃ ॥ ૩૦॥

ધીરધીરુદિતાનન્દઃ પેશલઃ પુણ્યકીર્તનઃ ।
પ્રાજ્ઞઃ પ્રસન્નમધુરો દૈન્યાદપગતાશયઃ ॥ ૩૧॥

અભ્યાસેન પરિસ્પન્દે પ્રાણાનાં ક્ષયમાગતે ।
મનઃ પ્રશમમાયાતિ નિર્વાણમવશિષ્યતે ॥ ૩૨॥

યતો વાચો નિવર્તન્તે વિકલ્પકલનાન્વિતાઃ ।
વિકલ્પસંક્ષયાજ્જન્તોઃ પદં તદવશિષ્યતે ॥ ૩૩॥

અનાદ્યન્તાવભાસાત્મા પરમાત્મૈવ વિદ્યતે ।
ઇત્યેતન્નિશ્ચયં સ્ફારં સમ્યગ્જ્ઞાનં વિદુર્બુધાઃ ॥ ૩૪॥

યથાભૂતાર્થદર્શિત્વમેતાવદ્ભુવનત્રયે ।
યદાત્મૈવ જગત્સર્વમિતિ નિશ્ચિત્ય પૂર્ણતા ॥ ૩૫॥

સર્વમાત્મૈવ કૌ દૃષ્ટૌ ભાવાભાવૌ ક્વ વા સ્થિતૌ ।
ક્વ બન્ધમોક્ષકલને બ્રહ્મૈવેદં વિજૃમ્ભતે ॥ ૩૬॥

સર્વમેકં પરં વ્યોમ કો મોક્ષઃ કસ્ય બન્ધતા ।
બ્રહ્મેદં બૃંહિતાકારં બૃહદ્બૃહદવસ્થિતમ્ ॥ ૩૭॥

દૂરાદસ્તમિતદ્વિત્વં ભવાત્મૈવ ત્વમાત્મના ।
સમ્યગાલોકિતે રૂપે કાષ્ઠપાષાણવાસસામ્ ॥ ૩૮॥

મનાગપિ ન ભેદોઽસ્તિ ક્વાસિ સંકલ્પનોન્મુખઃ ।
આદાવન્તે ચ સંશાન્તસ્વરૂપમવિનાશિ યત્ ॥ ૩૯॥

વસ્તૂનામાત્મનશ્ચૈતત્તન્મયો ભવ સર્વદા ।
દ્વૈતાદ્વૈતસમુદ્ભેદૈર્જરામરણવિભ્રમૈઃ ॥ ૪૦॥

સ્ફુરત્યાત્મભિરાત્મૈવ ચિત્તૈરબ્ધીવ વીચિભિઃ ।
આપત્કરઞ્જપરશું પરાયા નિર્વૃતેઃ પદમ્ ॥ ૪૧॥

શુદ્ધમાત્માનમાલિઙ્ગ્ય નિત્યમન્તસ્થયા ધિયા ।
યઃ સ્થિતસ્તં ક આત્મેહ ભોગો બાધયિતું ક્ષમઃ ॥ ૪૨॥

કૃતસ્ફારવિચારસ્ય મનોભોગાદયોઽરયઃ ।
મનાગપિ ન ભિન્દન્તિ શૈલં મન્દાનિલા ઇવ ॥ ૪૩॥

નાનાત્વમસ્તિ કલનાસુ ન વસ્તુતોઽન્ત-
    ર્નાનાવિધાસુ સરસીવ જલાદિવાન્યત્ ।
ઇત્યેકનિશ્ચયમયઃ પુરુષો વિમુક્ત
    ઇત્યુચ્યતે સમવલોકિતસમ્યગર્થઃ ॥ ૪૪॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

વિદેહમુક્તેઃ કિં રૂપં તદ્વાન્કો વા મહામુનિઃ ।
કં યોગં સમુપસ્થાય પ્રાપ્તવાન્પરમં પદમ્ ॥ ૧॥

સુમેરોર્વસુધાપીઠે માણ્ડવ્યો નામ વૈ મુનિઃ ।
કૌણ્ડિન્યાત્તત્ત્વમાસ્થાય જીવન્મુક્તો ભવત્યસૌ ॥ ૨॥

જીવન્મુક્તિદશાં પ્રાપ્ય કદાચિદ્બ્રહ્મવિત્તમઃ ।
સર્વેન્દ્રિયાણિ સંહર્તું મનશ્ચક્રે મહામુનિઃ ॥ ૩॥

બદ્ધપદ્માસનસ્તિષ્ઠન્નર્ધોન્મીલિતલોચનઃ ।
બાહ્યાનાભ્યાન્તરાંશ્ચૈવ સ્પર્શાન્પરિહરઞ્છનૈઃ ॥ ૪॥

તતઃ સ્વમનસઃ સ્થૈર્યં મનસા વિગતૈનસા ।
અહો નુ ચઞ્ચલમિદં પ્રત્યાહૃતમપિ સ્ફુટમ્ ॥ ૫॥

પટાદ્ઘટમુપાયાતિ ઘટાચ્છકટમુત્કટમ્ ।
ચિત્તમર્થેષુ ચરતિ પાદપેષ્વિવ મર્કટઃ ॥ ૬॥

પઞ્ચ દ્વારાણિ મનસા ચક્ષુરાદીન્યમૂન્યલમ્ ।

બુદ્ધીન્દ્રિયાભિધાનાનિ તાન્યેવાલોકયામ્યહમ્ ॥ ૭॥

હન્તેન્દ્રિયગણા યૂયં ત્યજતાકુલતાં શનૈઃ ।
ચિદાત્મા ભગવાન્સર્વસાક્ષિત્વેન સ્થિતોઽસ્મ્યહમ્ ॥ ૮॥

તેનાત્મના બહુજ્ઞેન નિર્જ્ઞાતાશ્ચક્ષુરાદયઃ ।
પરિનિર્વામિ શાન્તોઽસ્મિ દિષ્ટ્યાસ્મિ વિગતજ્વરઃ ॥ ૯॥

સ્વાત્મન્યેવાવતિષ્ઠેઽહં તુર્યરૂપપદેઽનિશમ્ ।
અન્તરેવ શશામાસ્ય ક્રમેણ પ્રાણસન્તતિઃ ॥ ૧૦॥

જ્વાલાજાલપરિસ્પન્દો દગ્ધેન્ધન ઇવાનલઃ ।
તદિતોઽસ્તં ગત ઇવ હ્યસ્તં ગત ઇવોદિતઃ ॥ ૧૧॥

સમઃ સમરસાભાસસ્તિષ્ઠામિ સ્વચ્છતાં ગતઃ ।
પ્રબુદ્ધોઽપિ સુષુપ્તિસ્થઃ સુષુપ્તિસ્થઃ પ્રબુદ્ધવાન્ ॥ ૧૨॥

તુર્યમાલમ્બ્ય કાયાન્તસ્તિષ્ઠામિ સ્તમ્ભિતસ્થિતિઃ ।
સબાહ્યાભ્યન્તરાન્ભાવાન્સ્થૂલાન્સૂક્ષ્મતરાનપિ ॥ ૧૩॥

ત્રૈલોક્યસંભવાંસ્ત્યક્ત્વા સંકલ્પૈકવિનિર્મિતાન્ ।
સહ પ્રણવપર્યન્તદીર્ઘનિઃસ્વનતન્તુના ॥ ૧૪॥

જહાવિન્દ્રિયતન્માત્રજાલં ખગ ઇવાનલઃ ।
તતોઽઙ્ગસંવિદં સ્વચ્છાં પ્રતિભાસમુપાગતામ્ ॥ ૧૫॥

સદ્યોજાતશિશુજ્ઞાનં પ્રાપ્તવાન્મુનિપુઙ્ગવઃ ।
જહૌ ચિત્તં ચૈત્યદશાં સ્પન્દશક્તિમિવાનિલઃ ॥ ૧૬॥

ચિત્સામાન્યમથાસાદ્ય સત્તામાત્રાત્મકં તતઃ ।
સુષુપ્તપદમાલમ્બ્ય તસ્થૌ ગિરિરિવાચલઃ ॥ ૧૭॥

સુષુપ્તસ્થૈર્યમાસાદ્ય તુર્યરૂપમુપાયયૌ ।
નિરાનન્દોઽપિ સાનન્દઃ સચ્ચાસચ્ચ બભૂવ સઃ ॥ ૧૮॥

તતસ્તુ સંબભૂવાસૌ યદ્ગિરામપ્યગોચરઃ ।
યચ્છૂન્યવાદિનાં શૂન્યં બ્રહ્મ બ્રહ્મવિદાં ચ યત્ ॥ ૧૯॥

વિજ્ઞાનમાત્રં વિજ્ઞાનવિદાં યદમલાત્મકમ્ ।
પુરુષઃ સાંખ્યદૃષ્ટીનામીશ્વરો યોગવાદિનામ્ ॥ ૨૦॥

શિવઃ શૈવાગમસ્થાનાં કાલઃ કાલૈકવાદિનામ્ ।
યત્સર્વશાસ્ત્રસિદ્ધાન્તં યત્સર્વહૃદયાનુગમ્ ॥ ૨૧॥

યત્સર્વં સર્વગં વસ્તુ યત્તત્ત્વં તદસૌ સ્થિતઃ ।
યદનુક્તમનિષ્પન્દં દીપકં તેજસામપિ ॥ ૨૨॥

સ્વાનુભૂત્યૈકમાનં ચ યત્તત્ત્વં તદસૌ સ્થિતઃ ।
યદેકં ચાપ્યનેકં ચ સાઞ્જનં ચ નિરઞ્જનમ્ ।
યત્સર્વં ચાપ્યસર્વં ચ યત્તત્ત્વં તદસુ સ્થિતઃ ॥ ૨૩॥

અજમમરમનાદ્યમાદ્યમેકં
પદમમલં સકલં ચ નિષ્કલં ચ ।
સ્થિત ઇતિ સ તદા નભઃસ્વરૂપા-
દપિવિમલસ્થિતિરીશ્વરઃ ક્ષણેન ॥ ૨૪॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

જીવન્મુક્તસ્ય કિં લક્ષ્મ હ્યાકાશગમનાદિકમ્ ।
તથા ચેન્મુનિશાર્દૂલ તત્ર નૈવ પ્રલક્ષ્યતે ॥ ૧॥

અનાત્મવિદમુક્તોઽપિ નભોવિહરણાદિકમ્ ।
દ્રવ્યમન્ત્રક્રિયાકાલશક્ત્યાપ્નોત્યેવ સ દ્વિજઃ ॥૨॥

નાત્મજ્ઞસ્યૈષ વિષય આત્મજ્ઞો હ્યાત્મમાત્રદૃક્ ।
આત્મનાત્મનિ સંતૃપ્તો નાવિદ્યામનુધાવતિ ॥ ૩॥

યે યે ભાવાઃ સ્થિતા લોકે તાનવિદ્યામયાન્વિદુઃ ।
ત્યક્તાવિદ્યો મહાયોગી કથં તેષુ નિમજ્જતિ ॥ ૪॥

યસ્તુ મૂઢોઽલ્પબુદ્ધિર્વા સિદ્ધિજાલાનિ વાઞ્છતિ ।
સિદ્ધિસાધનૈર્યોગૈસ્તાનિ સાધયતિ ક્રમાત્ ॥ ૫॥

દ્રવ્યમન્ત્રક્રિયાકાલયુક્તયઃ સાધુસિદ્ધિદાઃ ।
પરમાત્મપદપ્રાપ્તૌ નોપકુર્વન્તિ કાશ્ચન ॥ ૬॥

યસ્યેચ્છા વિદ્યતે કાચિત્સા સિદ્ધિં સાધયત્યહો ।
નિરિચ્છોઃ પરિપૂર્ણસ્ય નેચ્છા સંભવતિ ક્વચિત્ ॥ ૭॥

સર્વેચ્છાજાલસંશાન્તાવાત્મલાભો ભવેન્મુને ।
સ કથં સિદ્ધિજાલાનિ નૂનં વાઞ્છન્ત્યચિત્તકઃ ॥ ૮॥

અપિ શીતરુચાવર્કે સુતીક્ષ્ણેઽપીન્દુમણ્ડલે ।
અપ્યધઃ પ્રસરત્યગ્નૌ જીવન્મુક્તો ન વિસ્મયી ॥ ૯॥

અધિષ્ઠાને પરે તત્ત્વે કલ્પિતા રજ્જુસર્પવત્ ।
કલ્પિતાશ્ચર્યજાલેષુ નાભ્યુદેતિ કુતૂહલમ્ ॥ ૧૦॥

યે હિ વિજ્ઞાતવિજ્ઞેયા વીતરાગા મહાધિયઃ ।
વિચ્છિન્નગ્રન્થયઃ સર્વે તે સ્વતન્ત્રાસ્તનૌ સ્થિતઃ ॥ ૧૧
સુખદુઃખદશાધીરં સામ્યાન્ન પ્રોદ્ધરન્તિ યમ્ ।
નિશ્વાસા ઇવ શૈલેન્દ્રં ચિત્તં તસ્ય મૃતં વિદુઃ ॥ ૧૨॥

આપત્કાર્પણ્યમુત્સાહો મદો માન્દ્યં મહોત્સવઃ ।
યં નયન્તિ ન વૈરૂપ્યં તસ્ય નષ્ટં મનો વિદુઃ ॥ ૧૩॥

દ્વિવિધચિત્તનાશોઽસ્તિ સરૂપોઽરૂપ એવ ચ ।
જીવન્મુક્તૌ સરૂપઃ સ્યાદરૂપો દેહમુક્તિગઃ ॥ ૧૪॥

ચિત્તસત્તેહ દુઃખાય ચિત્તનાશઃ સુખાય ચ ।
ચિત્તસત્તં ક્ષયં નીત્વા ચિત્તં નાશમુપાનયેત્ ॥ ૧૫॥

મનસ્તાં મૂઢતાં વિદ્ધિ યદા નશ્યતિ સાનઘ ।
ચિત્તનાશાભિધાનં હિ તત્સ્વરૂપમિતીરિતમ્ ॥ ૧૬॥

મૈત્ર્યાદિભિર્ગુણૈર્યુક્તં ભવત્યુત્તમવાસનમ્ ।
ભૂયો જન્મવિનિર્મુક્તં જીવન્મુક્તસ્ય તન્મનઃ ॥ ૧૭॥

સરૂપોઽસૌ મનોનાશો જીવન્મુક્તસ્ય વિદ્યતે ।
નિદાઘાઽરૂપનાશસ્તુ વર્તતે દેહમુક્તિકે ॥ ૧૮॥

વિદેહમુક્ત એવાસૌ વિદ્યતે નિષ્કલાત્મકઃ ।
સમગ્રાગ્ર્યગુણાધારમપિ સત્ત્વં પ્રલીયતે ॥ ૧૯॥

વિદેહમુક્તૌ વિમલે પદે પરમપાવને ।
વિદેહમુક્તિવિષયે તસ્મિન્સત્ત્વક્ષયાત્મકે ॥ ૨૦॥

ચિત્તનાશે વિરૂપાખ્યે ન કિંચિદિહ વિદ્યતે ।
ન ગુણા નાગુણાસ્તત્ર ન શ્રીર્નાશ્રીર્ન લોકતા ॥ ૨૧॥

ન ચોદયો નાસ્તમયો ન હર્ષામર્ષસંવિદઃ ।
ન તેજો ન તમઃ કિંચિન્ન સન્ધ્યાદિનરાત્રયઃ ।

ન સત્તાપિ ન ચાસત્તા ન ચ મધ્યં હિ તત્પદમ્ ॥ ૨૨॥

યે હિ પારં ગતા બુદ્ધેઃ સંસારાડમ્બરસ્ય ચ ।
તેષાં તદાસ્પદં સ્ફારં પવનાનામિવામ્બરમ્ ॥ ૨૩॥

સંશાન્તદુઃખમજડાત્મકમેકસુપ્ત-
    માનન્દમન્થરમપેતરજસ્તમો યત્ ।
આકાશકોશતનવોઽતનવો મહાન્ત-
    સ્તસ્મિન્પદે ગલિતચિત્તલવા ભવન્તિ ॥ ૨૪॥

હે નિદાઘ મહાપ્રાજ્ઞ નિર્વાસનમના ભવ ।
બલાચ્ચેતઃ સમાધાય નિર્વિકલ્પમના ભવ ॥ ૨૫॥

યજ્જગદ્ભાસકં ભાનં નિત્યં ભાતિ સ્વતઃ સ્ફુરત્ ।
સ એવ જગતઃ સાક્ષી સર્વાત્મા વિમલાકૃતિઃ ॥ ૨૬॥

પ્રતિષ્ઠા સર્વભૂતાનાં પ્રજ્ઞાનઘનલક્ષણઃ ।
તદ્વિદ્યાવિષયં બ્રહ્મ સત્યજ્ઞાનસુખાદ્વનમ્ ॥ ૨૭॥

એકં બ્રહ્માહમસ્મીતિ કૃતકૃત્યો ભવેન્મુનિઃ ॥ ૨૮॥

સર્વાધિષ્ઠાનમદ્વન્દ્વં પરં બ્રહ્મ સનાતનમ્ ।
સચ્ચિદાનન્દરૂપં તદવાઙ્મનસગોચરમ્ ॥ ૨૯॥

ન તત્ર ચન્દ્રાર્કવપુઃ પ્રકાશતે
    ન વાન્તિ વાતઃ સકલાશ્ચ દેવતાઃ ।
સ એવ દેવઃ કૃતભાવભૂતઃ
    સ્વયં વિશુદ્ધો વિરજઃ પ્રકાશતે ॥ ૩૦॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૩૧॥

દ્વૌ સુપર્ણૌ શરીરેઽસ્મિઞ્જીવેશાખ્યૌ સહ સ્થિતૌ ।
તયોર્જીવઃ ફલં ભુઙ્ક્તે કર્મણો ન મહેશ્વરઃ ॥ ૩૨॥

કેવલં સાક્ષિરૂપેણ વિના ભોગો મહેશ્વરઃ ।
પ્રકાશતે સ્વયં ભેદઃ કલ્પિતો માયયા તયોઃ ।
ચિચ્ચિદાકારતો ભિન્ના ન ભિન્ના ચિત્ત્વહાનિતઃ ॥ ૩૩॥

તર્કતશ્ચ પ્રમાણાચ્ચ ચિદેકત્વવ્યવસ્થિતેઃ ।

ચિદેકત્વપરિજ્ઞાને ન શોચતિ ન મુહ્યતિ ॥ ૩૪॥

અધિષ્ઠાનં સમસ્તસ્ય જગતઃ સત્યચિદ્ઘનમ્ ।
અહમસ્મીતિ નિશ્ચિત્ય વીતશોકો ભવેન્મુનિઃ ॥ ૩૫॥

સ્વશરીરે સ્વયંજ્યોતિસ્વરૂપં સર્વસાક્ષિણમ્ ।
ક્ષીણદોષાઃ પ્રપશ્યન્તિ નેતરે માયયાવૃતાઃ ॥ ૩૬॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહૂઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૩૭॥

બાલેનૈવ હિ તિષ્ઠાસેન્નિર્વિદ્ય બ્રહ્મવેદનમ્ ।
બ્રહ્મવિદ્યાં ચ બાલ્યં ચ નિર્વિદ્ય મુનિરાત્મવાન્ ॥ ૩૮॥

અન્તર્લીનસમારમ્ભઃ શુભાશુભમહાઙ્કુરમ્ ।
સંસૃતિવ્રતતેર્બીજં શરીરં વિદ્ધિ ભૌતિકમ્ ॥ ૩૯॥

ભાવાભાવદશાકોશં દુઃખરત્નસમુદ્ગકમ્ ।
બીજમસ્ય શરીરસ્ય ચિત્તમાશાવશાનુગમ્ ॥ ૪૦॥

દ્વે બીજે ચિત્તવૃક્ષસ્ય વૃત્તિવ્રતતિધારિણઃ ।
એકં પ્રાણપરિસ્પન્દો દ્વિતીયો દૃઢભાવના ॥ ૪૧॥

યદા પ્રસ્પન્દન્તે પ્રાણો નાડીસંસ્પર્શનોદ્યતઃ ।
તદા સંવેદનમયં ચિત્તમાશુ પ્રજાયતે ॥ ૪૨॥

સા હિ સર્વગતા સંવિત્પ્રાણસ્પન્દેન બોધ્યતે ।
સંવિત્સંરોધનં શ્રેયઃ પ્રાણાદિસ્પન્દનં વરમ્ ॥ ૪૩॥

યોગિનશ્ચિત્તશાન્ત્યર્થં કુર્વન્તિ પ્રાણરોધનમ્ ।
પ્રાણાયામૈસ્તથા ધ્યાનૈઃ પ્રયોગૈર્યુક્તિકલ્પિતૈઃ ॥ ૪૪॥

ચિત્તોપશાન્તિફલદં પરમં વિદ્ધિ કારણમ્ ।
સુખદં સંવિદઃ સ્વાસ્થ્યં પ્રાણસંરોધનં વિદુઃ ॥ ૪૫॥

દૃઢભાવનયા ત્યક્તપૂર્વાપરવિચારણમ્ ।
યદાદાનં પદાર્થસ્ય વાસના સા પ્રકીર્તિતા ॥ ૪૬॥

યદા ન ભાવ્યતે કિંચિદ્ધેયોપાદેયરૂપિ યત્ ।
સ્થીયતે સકલં ત્યક્ત્વા તદા ચિત્તં ન જાયતે ॥ ૪૭॥

અવાસનત્વાત્સતતં યદા ન મનુતે મનઃ ।
અમનસ્તા તદોદેતિ પરમોપશમપ્રદા ॥ ૪૮॥

યદા ન ભાવ્યતે ભાવઃ ક્વચિજ્જગતિ વસ્તુનિ ।
તદા હૃદમ્બરે શૂન્યે કથં ચિત્તં પ્રજાયતે ॥ ૪૯॥

યદભાવનમાસ્થાય યદભાવસ્ય ભાવનમ્ ।
યદ્યથા વસ્તુદર્શિત્વં તદચિત્તત્વમુચ્યતે ॥ ૫૦॥

સર્વમન્તઃ પરિત્યજ્ય શીતલાશયવર્તિ યત્ ।
વૃત્તિસ્થમપિ તચ્ચિત્તમસદ્રૂપમુદાહૃતમ્ ॥ ૫૧॥

ભ્રષ્ટબીજોપમા યેષાં પુનર્જનનવર્જિતા ।
વાસનારસનાહીના જીવન્મુક્તા હિ તે સ્મૃતાઃ ॥ ૫૨॥

સત્ત્વરૂપપરિપ્રાપ્તચિત્તાસ્તે જ્ઞાનપારગાઃ ।
અચિત્તા ઇતિ કથ્યન્તે દેહાન્તે વ્યોમરૂપિણઃ ॥ ૫૩॥

સંવેદ્યસમ્પરિત્યાગાત્પ્રાણસ્પન્દનવાસને ।
સમૂલં નશ્યતઃ ક્ષિપ્રં મૂલચ્છેદાદિવ દ્રુમઃ ॥ ૫૪॥

પૂર્વદૃષ્ટમદૃષ્ટં વા યદસ્યાઃ પ્રતિભાસતે ।
સંવિદસ્તત્પ્રયત્નેન માર્જનીયં વિજાનતા ॥ ૫૫॥

તદમાર્જનમાત્રં હિ મહાસંસારતાં ગતમ્ ।
તત્પ્રમાર્જનમાત્રં તુ મોક્ષ ઇત્યભિધીયતે ॥ ૫૬॥

અજડો ગલિતાનન્દસ્ત્યક્તસંવેદનો ભવ ॥ ૫૭॥

સંવિદ્વસ્તુદશાલમ્બઃ સા યસ્યેહ ન વિદ્યતે ।
સોઽસંવિદજડઃ પ્રોક્તઃ કુર્વન્કાર્યશતાન્યપિ ॥ ૫૮॥

સંવેદ્યેન હૃદાકાશે મનાગપિ ન લિપ્યતે ।
યસ્યાસાવજડા સંવિજ્જીવન્મુક્તઃ સ કથ્યતે ॥ ૫૯॥

યદા ન ભાવ્યતે કિંચિન્નિર્વાસનતયાત્મનિ ।
બાલમૂકાદિવિજ્ઞાનમિવ ચ સ્થીયતે સ્થિરમ્ ॥ ૬૦॥

તદા જાડ્યવિનિર્મુક્તમસંવેદનમાતતમ્ ।
આશ્રિતં ભવતિ પ્રાજ્ઞો યસ્માદ્ભૂયો ન લિપ્યતે ॥ ૬૧॥

સમસ્તા વાસનાસ્ત્યક્ત્વા નિર્વિકલ્પસમાધિતઃ ।
તન્મયત્વાદનાદ્યન્તે તદપ્યન્તર્વિલીયતે ॥ ૬૨॥

તિષ્ઠન્ગચ્છન્સ્પૃશઞ્જિઘ્રન્નપિ તલ્લેપવર્જિતઃ ।
અજડો ગલિતાનન્દસ્ત્યક્તસંવેદનઃ સુખી ॥ ૬૩॥

એતાં દૃષ્ટિમવષ્ટભ્ય કષ્ટચેષ્ટાયુતોઽપિ સન્ ।
તરેદ્દુઃખામ્બુધેઃ પારમપારગુણસાગરઃ ॥ ૬૪॥

વિશેષં સમ્પરિત્યજ્ય સન્માત્રં યદલેપકમ્ ।
એકરૂપં મહારૂપં સત્તાયાસ્તત્પદં વિદુઃ ॥ ૬૫॥

કાલસત્તા કલાસત્તા વસ્તુસત્તેયમિત્યપિ ।
વિભાગકલનાં ત્યક્ત્વા સન્માત્રૈકપરો ભવ ॥ ૬૬॥

સત્તાસામાન્યમેવૈકં ભાવયન્કેવલં વિભુઃ ।
પરિપૂર્ણઃ પરાનન્દિ તિષ્ઠાપૂરિતદિગ્ભરઃ ॥ ૬૭॥

સત્તાસામાન્યપર્યન્તે યત્તત્કલનયોજ્ઝિતમ્ ।
પદમાદ્યમનાદ્યન્તં તસ્ય બીજં ન વિદ્યતે ॥ ૬૮॥

તત્ર સંલીયતે સંવિન્નિર્વિકલ્પં ચ તિષ્ઠતિ ।
ભૂયો ન વર્તતે દુઃખે તત્ર લબ્ધપદઃ પુમાન્ ॥ ૬૯॥

તદ્ધેતુઃ સર્વભૂતાનાં તસ્ય હેતુર્ન વિદ્યતે ।
સ સારઃ સર્વસારાણાં તસ્માત્સારો ન વિદ્યતે ॥ ૭૦॥

તસ્મિંશ્ચિદ્દર્પણે સ્ફારે સમસ્તા વસ્તુદૃષ્ટયઃ ।
ઇમાસ્તાઃ પ્રતિબિમ્બન્તિ સરસીવ તટદ્રુમાઃ ॥ ૭૧॥

તદમલમરજં તદાત્મતત્ત્વં
    તદવગતાવુપશાન્તિમેતિ ચેતઃ ।
અવગતવિગતૈકતત્સ્વરૂપો
    ભવભયમુક્તપદોઽસિ સમ્યગેવ ॥ ૭૨॥

એતેષાં દુઃખબીજાનાં પ્રોક્તં યદ્યન્મયોત્તરમ્ ।
તસ્ય તસ્ય પ્રયોગેણ શીઘ્રં તત્પ્રાપ્યતે પદમ્ ॥ ૭૩॥

સત્તાસામાન્યકોટિસ્થે દ્રાગિત્યેવ પદે યદિ ।
પૌરુષેણ પ્રયત્નેન બલાત્સંત્યજ્ય વાસનામ્ ॥ ૭૪॥

સ્થિતિં બધ્નાસિ તત્ત્વજ્ઞ ક્ષણમપ્યક્ષયાત્મિકામ્ ।
ક્ષણેઽસ્મિન્નેવ તત્સાધુ પદમાસાદયસ્યલમ્ ॥ ૭૫ ॥

સત્તાસામાન્યરૂપે વા કરોષિ સ્થિતિમાદરાત્ ।
તત્કિંચિદધિકેનેહ યત્નેનાપ્નોષિ તત્પદમ્ ॥ ૭૬ ॥

સંવિત્તત્ત્વે કૃતધ્યાનો નિદાઘ યદિ તિષ્ઠસિ ।
તદ્યત્નેનાધિકેનોચ્ચૈરાસાદયસિ તત્પદમ્ ॥ ૭૭ ॥

વાસનાસમ્પરિત્યાગે યદિ યત્નં કરોષિ ભોઃ ।
યાવદ્વિલીનં ન મનો ન તાવદ્વાસનાક્ષયઃ ॥ ૭૮ ॥

ન ક્ષીણા વાસના યાવચ્ચિત્તં તાવન્ન શામ્યતિ ।
યાવન્ન તત્ત્વવિજ્ઞાનં તાવચ્ચિત્તશમઃ કુતઃ ॥ ૭૯ ॥

યાવન્ન ચિત્તોપશમો ન તાવત્તત્ત્વવેદનમ્ ।
યાવન્ન વાસનાનાશસ્તાવત્તત્ત્વાગમઃ કુતઃ ।
યાવન્ન તત્ત્વસમ્પ્રાપ્તિર્ન તાવદ્વાસનક્ષયઃ ॥ ૮૦ ॥

તત્ત્વજ્ઞાનં મનોનાશો વાસનાક્ષય એવ ચ ।
મિથઃ કારણતાં ગત્વા દુઃસાધાનિ સ્થિતાન્યતઃ ॥ ૮૧ ॥

ભોગેચ્છાં દૂરતસ્ત્યક્ત્વા ત્રયમેતત્સમાચર ॥ ૮૨ ॥

વાસનાક્ષયવિજ્ઞાનમનોનાશા મહામતે ।
સમકાલં ચિરાભ્યસ્તા ભવન્તિ ફલદા મતાઃ ॥ ૮૩ ॥

ત્રિભિરેભિઃ સમભ્યસ્તૈર્હૃદયગ્રન્થયો દૃઢાઃ ।
નિઃશેષમેવ ત્રુટ્યન્તિ બિસચ્છેદાદ્ગુણા ઇવ ॥ ૮૪ ॥

વાસનાસમ્પરિત્યાગસમં પ્રાણનિરોધનમ્ ।
વિદુસ્તત્ત્વવિદસ્તસ્માત્તદપ્યેવં સમાહરેત્ ॥ ૮૫ ॥

વાસનાસમ્પરિત્યાગાચ્ચિત્તં ગચ્છત્યચિત્તતામ્ ।
પ્રાણસ્પન્દનિરોધાચ્ચ યથેચ્છસિ તથા કુરુ ॥ ૮૬ ॥

પ્રાણાયામદૃઢાભ્યાસૈર્યુક્ત્યા ચ ગુરુદત્તયા ।
આસનાશનયોગેન પ્રાણસ્પન્દો નિરુધ્યતે ॥ ૮૭ ॥

નિઃસઙ્ગવ્યવહારત્વાદ્ભવભાવનવર્જનાત્ ।
શરીરનાશદર્શિત્વાદ્વાસના ન પ્રવર્તતે ॥ ૮૮ ॥

યઃ પ્રાણપવનસ્પન્દશ્ચિત્તસ્પન્દઃ સ એવ હિ ।
પ્રાણસ્પન્દજયે યત્નઃ કર્તવ્યો ધીમતોચ્ચકૈઃ ॥ ૮૯॥

ન શક્યતે મનો જેતું વિના યુક્તિમનિન્દિતામ્ ।
શુદ્ધાં સંવિદમાશ્રિત્યવીતરાગઃ સ્થિરો ભવ ॥ ૯૦॥

સંવેદ્યવર્જિતમનુત્તમમાદ્યમેકં
    સંવિદત્પદં વિકલનં કલયન્મહાત્મન્ ।
હૃદ્યેવ તિષ્ઠ કલનારહિતઃ ક્રિયાં તુ
    કુર્વન્નકર્તૃપદમેત્ય શમોદિતશ્રીઃ ॥ ૯૧॥

મનાગપિ વિચારેણ ચેતસઃ સ્વસ્ય નિગ્રહઃ ।
પુરુષેણ કૃતો યેન તેનાપ્તં જન્મનઃ ફલમ્ ॥ ૯૨॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

ગચ્છતસ્તિષ્ઠતો વાપિ જાગ્રતઃ સ્વપતોઽપિ વા ।
ન વિચારપરં ચેતો યસ્યાસૌ મૃત ઉચ્યતે ॥ ૧॥

સમ્યગ્જ્ઞાનસમાલોકઃ પુમાઽજ્ઞેયસમઃ સ્વયમ્ ।
ન બિભેતિ ન ચાદત્તે વૈવશ્યં ન ચ દીનતામ્ ॥ ૨॥

અપવિત્રમપથ્યં ચ વિષસંસર્ગદૂષિતમ્ ।
ભુક્તં જરયતિ જ્ઞાની ક્લિન્નં નષ્ટં ચ મૃષ્ટવત્ ॥ ૩॥

સઞ્ગત્યાગં વિદુર્મોક્ષં સઙ્ગત્યાગાદજન્મતા ।
સઙ્ગં ત્યજ ત્વં ભાવાનાં જીવન્મુક્તો ભવાનઘ ॥ ૪॥

ભાવાભાવે પદાર્થાનાં હર્ષામર્ષવિકારદા ।
મલિના વાસના યૈષા સાઽસઙ્ગ ઇતિ કથ્યતે ॥ ૫॥

જીવન્મુક્તશરીરાણામપુનર્જન્મકારિણી ।
મુક્તા હર્ષવિષાદાભ્યાં શુદ્ધા ભવતિ વાસના ॥ ૬॥

દુઃખૈર્ન ગ્લાનિમાયાસિ હૃદિ હૃષ્યસિ નો સુખૈઃ ।
આશાવૈવશ્યમુત્સૃજ્ય નિદાઘાઽસઙ્ગતાં વ્રજ ॥ ૭॥

દિક્કાલાદ્યનવચ્છિન્નમદૃષ્ટોભયકોટિકમ્ ।
ચિન્માત્રમક્ષયં શાન્તમેકં બ્રહ્માસ્મિ નેતરત્ ॥ ૮॥

ઇતિ મત્વાહમિત્યન્તર્મુક્તામુક્તવપુઃ પુમાન્ ।
એકરૂપઃ પ્રશાન્તાત્મા મૌની સ્વાત્મસુખો ભવ ॥ ૯॥

નાસ્તિ ચિત્તં ન ચાવિદ્યા ન મનો ન ચ જીવકઃ ।
બ્રહ્મૈવૈકમનાદ્યન્તમબ્ધિવત્પ્રવિજૃમ્ભતે ॥ ૧૦॥

દેહે યાવદહંભાવો દૃશ્યેઽસ્મિન્યાવદાત્મતા ।
યાવન્મમેદમિત્યાસ્થા તાવચ્ચિત્તાદિવિભ્રમઃ ॥ ૧૧॥

અન્તર્મુખતયા સર્વં ચિદ્વહ્નૌ ત્રિજગત્તૃણમ્ ।
જુહ્વન્તોઽન્તર્નિવર્તન્તે મુને ચિત્તાદિવિભ્રમાઃ ॥ ૧૨॥

ચિદાત્માસ્મિ નિરંશોઽસ્મિ પરાપરવિવર્જિતઃ ।
રૂપં સ્મરન્નિજં સ્ફારં મા સ્મૃત્યા સંમિતો ભવ ॥ ૧૩॥

અધ્યાત્મશાસ્ત્રમન્ત્રેણ તૃષ્ણાવિષવિષૂચિકા ।
ક્ષીયતે ભાવિતેનાન્તઃ શરદા મિહિકા યથા ॥ ૧૪॥

પરિજ્ઞાય પરિત્યાગો વાસાનાનં ય ઉત્તમઃ ।
સત્તાસામાન્યરૂપત્વાત્તત્કૈવલ્યપદં વિદુઃ ॥ ૧૫॥

યન્નાસ્તિ વાસના લીના તત્સુષુમં ન સિદ્ધયે ।
નિર્બીજા વાસના યત્ર તત્તુર્યં સિદ્ધિદં સ્મૃતમ્ ॥ ૧૬॥

વાસનાયાસ્તથા વહ્નેરૃણવ્યાધિદ્વિષામપિ ।
સ્નેહવૈરવિષાણ ચ શેષઃ સ્વલ્પોઽપિ બાધતે ॥ ૧૭॥

નિર્દગ્ધવાસનાબીજઃ સત્તાસામાન્યરૂપવાન્ ।
સદેહો વા વિદેહો વા ન ભૂયો દુઃખભાગ્ભવેત્ ॥ ૧૮॥

એતાવદેવાવિદ્યાત્વં નેદં બ્રહ્મેતિ નિશ્ચયઃ ।
એષ એવ ક્ષયસ્તસ્યા બ્રહ્મેદમિતિ નિશ્ચયઃ ॥ ૧૯॥

બ્રહ્મ ચિદ્બ્રહ્મ ભુવનં બ્રહ્મ ભૂતપરમ્પરા ।
બ્રહ્માહં બ્રહ્મ ચિચ્છત્રુર્બ્રહ્મ ચિન્મિત્રબાન્ધવાઃ ॥ ૨૦॥

બ્રહ્મૈવ સર્વમિત્યેવ ભાવિતે બ્રહ્મ વૈ પુમાન્ ।
સર્વત્રાવસ્થિતં શાન્તં ચિદ્બ્રહ્મેત્યનુભૂયતે ॥ ૨૧॥

અસંસ્કૃતાધ્વગાલોકે મનસ્યન્યત્ર સંસ્થિતે ।
યા પ્રતીતિરનાગસકા તચ્ચિદ્બ્રહ્માસ્મિ સર્વગમ્ ॥ ૨૨॥

પ્રશાન્તસર્વસંકલ્પં વિગતાખિલકૌતુકમ્ ।
વિગતાશેષસંરંભં ચિદાત્માનં સમાશ્રય ॥ ૨૩॥

એવં પૂર્ણધિયો ધીરાઃ સમા નીરાગચેતસઃ ।
ન નન્દન્તિ ન નિન્દન્તિ જીવિતં મરણં તથા ॥ ૨૪॥

પ્રાણોઽયમનિશં બ્રહ્મસ્પન્દશક્તિઃ સદાગતિઃ ।
સબાહ્યાભ્યન્તરે દેહેપ્રાણોઽસાવૂર્ધ્વગઃ સ્થિતઃ ॥ ૨૫॥

અપાનોઽપ્યનિશં બ્રહ્મસ્પન્દશક્તિઃ સદાગતિઃ ।
સબાહ્યાભ્યન્તરે દેહે અપાનોઽયમવાક્સ્થિતઃ ॥ ૨૬॥

જાગ્રતઃ સ્વપતશ્ચૈવ પ્રાણાયામોઽયમુત્તમઃ ।
પ્રવર્તતે હ્યભિજ્ઞસ્ય તં તાવચ્છ્રેયસે શ ૃણુ ॥ ૨૭॥

દ્વાદશાઙ્ગુલપર્યન્તં બાહ્યમાક્રમતાં તતઃ ।
પ્રાણાઙ્ગનામા સંસ્પર્શો યઃ સ પૂરક ઉચ્યતે ॥ ૨૮॥

અપાનશ્ચન્દ્રમા દેહમાપ્યાયયતિ સુવ્રત ।
પ્રાણઃ સૂર્યોઽગ્નિરથ વા પચત્યનત્રિદં વપુઃ ॥ ૨૯॥

પ્રાણક્ષયસમીપસ્થમપાનોદયકોટિગમ્ ।
અપાનપ્રાણયોરૈક્યં ચિદાત્માનં સમાશ્રય ॥ ૩૦॥

અપાનોઽસ્તંગતો યત્ર પ્રાણો નાભ્યુદિતઃ ક્ષણમ્ ।
કલાકલઙ્કરહિતં તચ્ચિત્તત્ત્વં સમાશ્રય ॥ ૩૧॥

નાપાનોઽસ્તંગતો યત્ર પ્રાણશ્ચાસ્તમુપાગતઃ ।
નાસાગ્રગમનાવર્તં તચ્ચિત્તત્ત્વમુપાશ્રય ॥ ૩૨॥

આભાસમાત્રમેવેદં ન સનાસજ્જગત્ત્રયમ્ ।
ઇત્યન્યકલનાત્યાગં સમ્યગ્જ્ઞાનં વિદુર્બુધાઃ ॥ ૩૩॥

આભાસમાત્રકં બ્રહ્મંશ્ચિત્તદર્શકલઙ્કિતમ્ ।
તતસ્તદપિ સંત્યજ્ય નિરાભાસો ભવોત્તમ ॥ ૩૪॥

ભયપ્રદમકલ્યાણં ધૈર્યસર્વસ્વહારિણમ્ ।
મનઃપિશાચમુત્સાર્ય યોઽસિ સોઽસિ સ્થિરો ભવ ॥ ૩૫॥

ચિદ્વ્યોમેવ કિલાસ્તીહ પરાપરવિવર્જિતમ્ ।

સર્વત્રાસંભવચ્ચૈત્યં યત્કલ્પાન્તેઽવશિષ્યતે ॥ ૩૬॥

વાઞ્છાક્ષણે તુ યા તુષ્ટિસ્તત્ર વાઞ્છૈવ કારણમ્ ।
તુષ્ટિસ્ત્વતુષ્ટિપર્યન્તા તસ્માદ્વાઞ્છાં પરિત્યજ ॥ ૩૭॥

આશા યાતુ નિરાશાત્વમભાવં યાતુ ભાવના ।
અમનસ્ત્વં મનો યાતુ તવાસઙ્ગેન જીવતઃ ॥ ૩૮॥

વાસનારહિતૈરન્તરિન્દ્રિયૈરાહરન્ક્રિયા ।
ન વિકારમવાપ્નોષિ ખવત્ક્ષોભશતૈરપિ ॥ ૩૯॥

ચિત્તોન્મેષનિમેષાભ્યાં સંસારપ્રલયોદયૌ ।
વાસનાપ્રાણસંરોધમનુન્મેષં મનઃ કુરુ ॥ ૪૦॥

પ્રાણોન્મેષનિમેષાભ્યાં સંસૃતેઃ પ્રલયોદયૌ ।
તમભ્યાસપ્રયોગાભ્યામુન્મેષરહિતં કુરુ ॥ ૪૧॥

મૌર્ખ્યોન્મેષનિમેષાભ્યાં કર્મણાં પ્રલયોદયૌ ।
તદ્વિલીનં કુરુ બલાદ્ગુરુશાસ્ત્રાર્થસંગમૈઃ ॥ ૪૨॥

અસંવિત્સ્પન્દમાત્રેણ યાતિ ચિત્તમચિત્તતામ્ ।
પ્રાણાનાં વા નિરોધેન તદેવ પરમં પદમ્ ॥ ૪૩॥

દૃશ્યદર્શનસંબન્ધે યત્સુખં પારમાર્થિકમ્ ।
તદન્તૈકાન્તસંવિત્ત્યા બ્રહ્મદૃષ્ટ્યાવલોકય ॥ ૪૪॥

યત્ર નાભ્યુદિતં ચિત્તં તદ્વૈ સુખમકૃત્રિમમ્ ।
ક્ષયાતિશયનિર્મુક્તં નોદેતિ ન ચ શામ્યતિ ॥ ૪૫॥

યસ્ય ચિત્તં ન ચિત્તાખ્યં ચિત્તં ચિત્તત્ત્વમેવ હિ ।
તદેવ તુર્યાવસ્થાયં તુર્યાતીતં ભવત્યતઃ ॥ ૪૬॥

સંન્યસ્તસર્વસંકલ્પઃ સમઃ શાન્તમના મુનિઃ ।
સંન્યાસયોગયુક્તાત્મા જ્ઞાનવાન્મોક્ષવાન્ભવ ॥ ૪૭॥

સર્વસંકલ્પસંશાન્તં પ્રશાન્તઘનવાસનમ્ ।
ન કિંચિદ્ભાવનાકારં યત્તદ્બ્રહ્મ પરં વિદુઃ ॥ ૪૮॥

સમ્યગ્જ્ઞાનાવરોધેન નિત્યમેકસમાધિના ।
સાંખ્ય એવાવબુદ્ધા યે તે સાંખ્યા યોગિનઃ પરે ॥ ૪૯॥

પ્રાણાદ્યનિલસંશાન્તૌ યુક્ત્યા યે પદમાગતાઃ ।
અનામયમનાદ્યન્તં તે સ્મૃતા યોગયોગિનઃ ॥ ૫૦॥

ઉપાદેયં તુ સર્વેષાં શાતં પદમકૃત્રિમમ્ ।
એકાર્થાભ્યસનં પ્રાણરોધશ્ચેતઃ પરિક્ષયઃ ॥ ૫૧॥

એકસ્મિન્નેવ સંસિદ્ધે સંસિદ્ધ્યન્તિ પરસ્પરમ્ ।
અવિનાભાવિની નિત્યં જન્તૂનાં પ્રાણચેતસી ॥ ૫૨॥

આધારાધેયવચ્ચૈતે એકભાવે વિનશ્યતઃ ।
કુરુતઃ સ્વવિનાશેન કાર્યં મોક્ષાખ્યમુત્તમમ્ ॥ ૫૩॥

સર્વમેતદ્ધિયા ત્યક્ત્વા યદિ તિષ્ઠસિ નિશ્ચલઃ ।
તદાહંકારવિલયે ત્વમેવ પરમં પદમ્ ॥ ૫૪॥

મહાચિદેકૈવેહાસ્તિ મહાસત્તેતિ યોચ્યતે ।
નિષ્કલંકા સમા શુદ્ધા નિરહંકારરૂપિણી ॥ ૫૫॥

સકૃદ્વિભાતા વિમલા નિત્યોદયવતી સમા ।
સા બ્રહ્મ પરમાત્મેતિ નામભિઃ પરિગીયતે ॥ ૫૬॥

સૈવાહમિતિ નિશ્ચિત્ય નિદાઘ કૃતકૃત્યવાન્ ।
ન ભૂતં ન ભવિષ્યચ્ચ ચિન્તયામિ કદાચન ॥ ૫૭॥

દૃષ્ટિમાલમ્બ્ય તિષ્ઠામિ વર્તમાનામિહાત્મના ।
ઇદમદ્ય મયા લબ્ધમિદં પ્રાપ્સ્યામિ સુન્દરમ્ ॥ ૫૮॥

ન સ્તૌમિ ન ચ નિન્દામિ આત્મનોઽન્યન્નહિ ક્વચિત્ ।
ન તુષ્યામિ શુભપ્રાપ્તૌ ન ખિદ્યામ્યશુભાગમે ॥ ૫૯॥

પ્રશાન્તચાપલં વીતશોકમસ્તસમીહિતમ્ ।
મનો મમ મુને શાન્તં તેન જીવામ્યનામયઃ ॥ ૬૦॥

અયં બન્ધુઃ પરશ્ચાયં મમાયમયમન્યકઃ ।
ઇતિ બ્રહ્મન્ન જાનામિ સંસ્પર્શં ન દદામ્યહમ્ ॥ ૬૧॥

વાસનામાત્રસંત્યાગાજ્જરામરણવર્જિતમ્ ।
સવાસનં મનો જ્ઞાનં જ્ઞેયં નિર્વાસનં મનઃ ॥ ૬૨॥

ચિત્તે ત્યક્તે લયં યાતિ દ્વૈતમેતચ્ચ સર્વતઃ ।
શિષ્યતે પરમં શાન્તમેકમગચ્છમનામયમ્ ॥ ૬૩॥

અનન્તમજમવ્યક્તમજરં શાન્તમચ્યુતમ્ ।
અદ્વિતીયમનાદ્યન્તં યદાદ્યમુપલમ્ભનમ્ ॥ ૬૪॥

એકમાદ્યન્તરહિતં ચિન્માત્રમમલં તતમ્ ।
ખાદપ્યતિતરાં સૂક્ષ્મં તદ્બ્રહ્માસ્મિ ન સંશયઃ ॥ ૬૫॥

દિક્કાલાદ્યનવચ્છિન્નં સ્વચ્છં નિત્યોદિતં તતમ્ ।
સર્વાર્થમયમેકાર્થં ચિન્માત્રમમલં ભવ ॥ ૬૬॥

સર્વમેકમિદં શાન્તમાદિમધ્યાન્તવર્જિતમ્ ।
ભાવાભાવમજં સર્વમિતિ મત્વા સુખી ભવ ॥ ૬૭॥

ન બદ્ધોઽસ્મિ ન મુક્તોઽસ્મિ બ્રહ્મૈવાસ્મિ નિરામયમ્ ।
દ્વૈતભાવવિમુક્તોઽસ્મિ સચ્ચિદાનન્દલક્ષણઃ ।
એવં ભાવય યત્નેન જીવન્મુક્તો ભવિષ્યસિ ॥ ૬૮॥

પદાર્થવૃન્દે દેહાદિધિયા સંત્યજ્ય દૂરતઃ ।
આશીતલાન્તઃકરણો નિત્યમાત્મપરો ભવ ॥ ૬૯॥

ઇદં રમ્યમિદં નેતિ બીજં તે દુઃખસંતતેઃ ।
તસ્મિન્સામ્યાગ્નિના દગ્ધે દુઃખસ્યાવસરઃ કુતઃ ॥ ૭૦॥

શાસ્ત્રસજ્જનસમ્પર્કૈઃ પ્રજ્ઞામાદૌ વિવર્ધયેત્ ॥ ૭૧॥

ઋતં સત્યં પરં બ્રહ્મ સર્વસંસારભેષજમ્ ।
અત્યર્થમમલં નિત્યમાદિમધ્યાન્તવર્જિતમ્ ॥ ૭૨॥

તથા સ્થૂલમનાકાશમસંસ્પૃશ્યમચાક્ષુષમ્ ।
ન રસં ન ચ ગન્ધાખ્યમપ્રમેયમનૂપમમ્ ॥ ૭૩॥

આત્માનં સચ્ચિદાનન્દમનન્તં બ્રહ્મ સુવ્રત ।
અહમસ્મીત્યભિધ્યાયેદ્ધ્યેયાતીતં વિમુક્તયે ॥ ૭૪॥

સમાધિઃ સંવિદુત્પત્તિઃ પરજીવૈકતં પ્રતિ ।
નિત્યઃ સર્વગતો હ્યાત્મા કૂટસ્થો દોષવર્જિતઃ ॥ ૭૫॥

એકઃ સન્ભિદ્યતે ભ્રાન્ત્યા માયયા ન સ્વરૂપતઃ ।
તસ્માદદ્વૈત એવાસ્તિ ન પ્રપઞ્ચો ન સંસૃતિઃ ॥ ૭૬॥

યથાકાશો ઘટાકાશો મહાકાશ ઇતીરિતઃ ।

તથા ભ્રાન્તેર્દ્વિધા પ્રોક્તો હ્યાત્મા જીવેશ્વરાત્મના ॥ ૭૭॥

યદા મનસિ ચૈતન્યં ભાતિ સર્વત્રગં સદા ।
યોગિનોઽવ્યવધાનેન તદા સમ્પદ્યતે સ્વયમ્ ॥ ૭૮॥

યદા સર્વાણિ ભૂતાનિ સ્વાત્મન્યેવ હિ પશ્યતિ ।
સર્વભૂતેષુ ચાત્માનં બ્રહ્મ સમ્પદ્યતે સદા ॥ ૭૯॥

યદા સર્વાણિ ભૂતાનિ સમાધિસ્થો ન પશ્યતિ ।
એકીભૂતઃ પરેણાસૌ તદા ભવતિ કેવલઃ ॥ ૮૦॥

શાસ્ત્રસજ્જનસમ્પર્કવૈરાગ્યાભ્યાસરૂપિણી ।
પ્રથમા ભૂમિકૈષોક્તા મુમુક્ષુત્વપ્રદાયિની ॥ ૮૧॥

વિચારણા દ્વિતીયા સ્યાત્તૃતીયા સાઙ્ગભાવના ।
વિલાપિની ચતુર્થી સ્યાદ્વાસના વિલયાત્મિકા ॥ ૮૨॥

શુદ્ધસંવિન્મનાનન્દરૂપા ભવતિ પઞ્ચમી ।
અર્ધસુપ્તપ્રબુદ્ધાભો જીવન્મુક્તોઽત્ર તિષ્ઠતિ ॥ ૮૩॥

અસંવેદનરૂપા ચ ષષ્ઠી ભવતિ ભૂમિકા ।
આનન્દૈકઘનાકારા સુષુપ્તસદૃશી સ્થિતિઃ ॥ ૮૪॥

તુર્યાવસ્થોપશાન્તા સા મુક્તિરેવ હિ કેવલા ।
સમતા સ્વચ્છતા સૌમ્યા સપ્તમી ભૂમિકા ભવેત્ ॥ ૮૫॥

તુર્યાતીતા તુ યાવસ્થા પરા નિર્વાણરૂપિણી ।
સપ્તમી સા પરા પ્રૌઢા વિષયો નૈવ જીવતામ્ ॥ ૮૬॥

પૂર્વાવસ્થાત્રયં તત્ર જાગ્રદિત્યેવ સંસ્થિતમ્ ।
ચતુર્થી સ્વપ્ન ઇત્યુક્તા સ્વપ્નાભં યત્ર વૈ જગત્ ॥ ૮૭॥

આનન્દૈકઘનાકારા સુષુપ્તાખ્યા તુ પઞ્ચમી ।
અસંવેદનરૂપા તુ ષષ્ઠી તુર્યપદાભિધા ॥ ૮૮॥

તુર્યાતીતપદાવસ્થા સપ્તમી ભૂમિકોત્તમા ।
મનોવચોભિરગ્રાહ્યા સ્વપ્રકાશસદાત્મિકા ॥ ૮૯॥

અન્તઃ પ્રત્યાહૃતિવશાચ્ચૈત્યં ચેન્ન વિભાવિતમ્ ।
મુક્ત એવ ન સન્દેહો મહાસમતયા તયા ॥ ૯૦॥

ન મ્રિયે ન ચ જીવામિ નાહં સન્નાપ્યસન્મયઃ ।
અહં ન કિંચિચ્ચિદિતિ મત્વા ધીરો ન શોચતિ ॥ ૯૧॥

અલેપકોઽહમજરો નીરાગઃ શાન્તવાસનઃ ।
નિરંશોઽસ્મિ ચિદાકાશમિતિ મત્વા ન શોચતિ ॥ ૯૨॥

અહંમત્યા વિરહિતઃ શુદ્ધો બુદ્ધોઽજરોઽમરઃ ।
શાન્તઃ શમસમાભાસ ઇતિ મત્વા ન શોચતિ ॥ ૯૩॥

તૃણાગ્રેષ્વમ્બરે ભાનૌ નરનાગામરેષુ ચ ।
યત્તિષ્ઠતિ તદેવાહમિતિ મત્વા ન શોચતિ ॥ ૯૪॥

ભાવનાં સર્વભાવેભ્યઃ સમુત્સૃજ્ય સમુત્થિતઃ ।
અવશિષ્ટં પરં બ્રહ્મ કેવલોઽસ્મીતિ ભાવય ॥ ૯૫॥

વાચામતીતવિષયો વિષયાશાદશોજ્ઝિતઃ ।
પરાનન્દરસાક્ષુબ્ધો રમતે સ્વાત્મનાત્મનિ ॥ ૯૬॥

સર્વકર્મપરિત્યાગી નિત્યતૃપ્તો નિરાશ્રયઃ ।
ન પુણ્યેન ન પાપેન નેતરેણ ચ લિપ્યતે ॥ ૯૭॥

સ્ફટિકઃ પ્રતિબિમ્બેન યથા નાયાતિ રઞ્જનમ્ ।
તજ્જ્ઞઃ કર્મફલેનાન્તસ્તથા નાયાતિ રઞ્જનમ્ ॥ ૯૮॥

વિહરઞ્જનતાવૃન્દે દેવકીર્તન પૂજનૈઃ ।
ખેદાહ્લાદૌ ન જાનાતિ પ્રતિબિમ્બગતૈરિવ ॥ ૯૯॥

નિસ્સ્તોત્રો નિર્વિકારશ્ચ પૂજ્યપૂજાવિવર્જિતઃ ।
સંયુક્તશ્ચ વિયુક્તશ્ચ સર્વાચારનયક્રમૈઃ ॥ ૧૦૦॥

તનું ત્યજતુ વા તીર્થે શ્વપચસ્ય ગૃહેઽથ વા ।
જ્ઞાનસમ્પત્તિસમયે મુક્તોઽસૌ વિગતાશયઃ ॥ ૧૦૧॥

સંકલ્પત્વં હિ બન્ધસ્ય કારણં તત્પરિત્યજ ।
મોક્ષો ભવેદસંકલ્પાત્તદભ્યાસં ધિયા કુરુ ॥ ૧૦૨॥

સાવધાનો ભવ ત્વં ચ ગ્રાહ્યગ્રાહકસંગમે ।
અજસ્રમેવ સંકલ્પદશાઃ પરિહરઞ્શનૈઃ ॥ ૧૦૩॥

મા ભવ ગ્રાહ્યભાવાત્મા ગ્રાહકાત્મા ચ મા ભવ ।
ભાવનામખિલાં ત્યક્ત્વા યચ્છિષ્ટં તન્મયો ભવ ॥ ૧૦૪॥

કિંચિચ્ચેદ્રોચતે તુભ્યં તદ્બદ્ધોઽસિ ભવસ્થિતૌ ।
ન કિંચિદ્રોચતે ચેત્તે તન્મુક્તોઽસિ ભવસ્થિતૌ ॥ ૧૦૫॥

અસ્માત્પદાર્થનિચયાદ્યાવત્સ્થાવરજઙ્ગમાત્ ।
તૃણાદેર્દેહપર્યન્તાન્મા કિંચિત્તત્ર રોચતામ્ ॥ ૧૦૬॥

અહંભાવાનહંભાવૌ ત્યક્ત્વા સદસતી તથા ।
યદસક્તં સમં સ્વચ્છં સ્થિતં તત્તુર્યમુચ્યતે ॥ ૧૦૭॥

યા સ્વચ્છા સમતા શાન્તા જીવન્મુક્તવ્યવસ્થિતિઃ ।
સાક્ષ્યવસ્થા વ્યવહૃતૌ સા તુર્યા કલનોચ્યતે ॥ ૧૦૮॥

નૈતજ્જાગ્રન્ન ચ સ્વપ્નઃ સંકલ્પાનામસંભવાત્ ।
સુષુપ્તભાવો નાઽપ્યેતદભાવાજ્જડતાસ્થિતેઃ ॥ ૧૦૯॥

શાન્તસમ્યક્પ્રબુદ્ધાનાં યથાસ્થિતમિદં જગત્ ।
વિલીનં તુર્યમિત્યાહુરબુદ્ધાનાં સ્થિતં સ્થિરમ્ ॥ ૧૧૦॥

અહંકારકલાત્યાગે સમતાયાઃ સમુદ્ગમે ।
વિશરારૌ કૃતે ચિત્તે તુર્યાવસ્થોપતિષ્ઠતે ॥ ૧૧૧॥

સિદ્ધાન્તોઽધ્યાત્મશાસ્ત્રાણાં સર્વાપહ્નવ એવ હિ ।
નાવિદ્યાસ્તીહ નો માયા શાન્તં બ્રહ્મેદમક્લમમ્ ॥ ૧૧૨॥

શાન્ત એવ ચિદાકાશે સ્વચ્છે શમસમાત્મનિ ।
સમગ્રશક્તિખચિતે બ્રહ્મેતિ કલિતાભિધે ॥ ૧૧૩॥

સર્વમેવ પરિત્યજ્ય મહામૌની ભવાનઘ ।
નિર્વાણવાન્નિર્મનનઃ ક્ષીણચિત્તઃ પ્રશાન્તધીઃ ॥ ૧૧૪॥

આત્મન્યેવાસ્વ શાન્તાત્મા મૂકાન્ધબધિરોપમઃ ।
નિત્યમન્તર્મુખઃ સ્વચ્છઃ સ્વાત્મનાન્તઃ પ્રપૂર્ણધીઃ ॥ ૧૧૫॥

જાગ્રત્યેવ સુષુપ્તસ્થઃ કુરુ કર્માણિ વૈ દ્વિજ ।
અન્તઃ સર્વપરિત્યાગી બહિઃ કુરુ યથાગતમ્ ॥ ૧૧૬॥

ચિત્તસત્તા પરં દુઃખં ચિત્તત્યાગઃ પરં સુખમ્ ।
અતશ્ચિત્તં ચિદાકાશે નય ક્ષયમવેદનાત્ ॥ ૧૧૭॥

દૃષ્ટ્વા રમ્યમરમ્યં વા સ્થેયં પાષાણવત્સદા ।

એતાવતાત્મયત્નેન જિતા ભવતિ સંસૃતિઃ ॥ ૧૧૮॥

વેદાન્તે પરમં ગુહ્યં પુરાકલ્પપ્રચોદિતમ્ ।
નાપ્રશાન્તાય દાતવ્યં ન ચાશિષ્યાય વૈ પુનઃ ॥ ૧૧૯॥

અન્નપૂર્ણોપનિષદં યોઽધીતે ગુર્વનુગ્રહાત્ ।
સ જીવન્મુક્તતાં પ્રાપ્ય બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૨૦॥

ઇત્યુપનિષત્ ॥ ઇતિ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁસસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યન્નપૂર્ણોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Annapurna Upanishad*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*